**19E**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र ६ वे**

**विषय: वेणीसंहार (19E466)**

**दिनांक : ०९/०१/२०२३** **गुण :८०** **वेळ : दु. ०२.०० ते ५.००**

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. षण्णां श्लोकानां अनुवादं कुरुत।** **(३०)**

१) तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयां, वने व्याधै: सार्धं सुचिरमुषितं वल्कलधरै:।
विराटस्यावासे स्थितमनुचितारम्भनिभृतं, गुरु: खेदं खिन्ने मयि भजति, नाद्यापि कुरुषु।।

२) मथ्नामि कौरवशतं समरे न कोपात्? दु:शासनस्य रुधिरं न पिबाम्युरस्त:?
संचूर्णयामि गदया न सुयोधनोरू? सन्धिं करोतु भवतां नृपति: पणेन।।

३) आ शस्त्रग्रहणादकुण्ठपरगोस्तस्यापि जेता मुनेस्तापायास्य न पाण्डुसूनुभिरयं भीष्म: शरै: शापित:
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो बालस्यायमरातिलून धनुष: प्रीतोऽभिमन्योर्वधात्।।

४) दु:शासनस्य हृदयक्षतजाम्बुपाने दुर्योधनस्य च यथा गदयोरूभङ्गे।
तेजस्विना समरमूर्धनि पाण्डवानां ज्ञेया जयद्रथवधेऽपि तया प्रतिज्ञा।।

५) महाप्रलयमारुतक्षुभितपुष्करावर्तकप्रचण्डधनगर्जितप्रतिरवानुकारी मुहु:।
रव: श्रवणभैरव: स्थगितरोदसीकन्दर: कुतोऽद्य समरोदधेरयमभूतपूर्व: पुर:।।

६) तातस्तव प्रणयवान्स पितु: सखा मे शस्त्रे यथा तव गुरू: स तथा ममापि।
किं तस्य देहनिधने कथयामि दु:खं? जानीहि तद् गुरुशुचा मनसा त्वमेव।।

७) भुक्तो यथेष्टमुपभोगसुखेषु नैव त्वं लालितोऽपि हि मया न वृथाग्रजेन।
अस्यास्तु वत्स तव हेतुरहं विपत्तेर्यत्कारितोऽस्यविनयं, न च रक्षितोऽसि।।

**प्र.२ केषांचित् चतुर्णां वाक्यानां ससन्दर्भं स्पष्टीकरणं कुरुत।** **(२४)**

१. दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्।
२. कुतोऽद्यापि ते तात:।
३. शतसंख्या पुनरियं सानुजं स्पृशतीव माम्।
४. प्रत्यक्षं हतबन्धूनां कुतो दु:खं कुतो व्यथा।
५. फलन्ति काकतालीयं- तेभ्य: प्राज्ञा न बिभ्यति।
६. आ: दारुणमुपक्रान्तं मया नृशंसेन।

**प्र.३. लघुनिबन्धं लिखत।** **(१४)**

तृतीयाङ्कस्य प्रवेशक:

**अथवा**

भीमसेनस्य व्यक्तिरेखा

**प्र.४. टिप्पणीद्वयं लिखित।** **(१२)**

१. नान्दी २. पञ्चसंधय: ३. पताकास्थानम्

----------